National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2020; 1(29): 93-94
© 2020 NJHSR
www.sanskritarticle.com

**डॉ. दयालसिंह पँवार**
सहाचार्य, व्याकरण-विभाग,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-विश्वविद्यालय कुतुब सांस्थानिक क्षेत्र,
नई दिल्ली 110016

**Correspondence:**
**डॉ. दयालसिंह पँवार**
सहाचार्य, व्याकरण-विभाग,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-विश्वविद्यालय कुतुब सांस्थानिक क्षेत्र,
नई दिल्ली 110016

# भारतीयदर्शनेषु प्रत्यक्ष-विमर्शः

**डॉ. दयालसिंह पँवार**

## 1. भूमिका –

भारतीय दर्शनपरम्परायां विविधेषु दर्शनेषु विविधाः पदार्थाः स्वीक्रियन्ते। सर्वेषां दार्शनिकानां संसारं द्रष्टुं वर्तते विलक्षणं चक्षुः। तेनैव विलक्षणेन चक्षुषा ते संसारं, जीवं,, ब्रह्म चान्यान् पदार्थान् पश्यन्ति। "लक्षणप्रमाणाभ्यां वस्तुसिद्धीर्भवती"ति विचारमुररीकृत्यैव स्वपदार्थसिद्ध्यर्थं तैः प्रमाणविवेचनं विधीयते। तेषां तत्त्वदर्शिनां वर्तते यो यथार्थानुभवः, स एव प्रमोच्यते। तस्या एव प्रमायाः करणं[1] प्रमाणमुच्यते।

## 2. प्रत्यक्षप्रमाणस्य ज्येष्ठत्वम् –

कियन्ति प्रमाणानीत्यस्मिन् विषये स्वकीयां दार्शनिकीमावश्यकतामनुसृत्य दार्शनिकेषु वर्तते स्वाभाविकतया भूयान् मतभेदः। तद्यथा – नास्तिकाश्चार्वाकाः केवलमेकं प्रत्यक्षं प्रमाणत्वेनाङ्गीकुर्वन्ति। तथैव साङ्ख्याः प्रमाणद्वयं, नैयायिकाश्च चत्वारि प्रमाणान्युररीकुर्वन्ति। अपरे च केचन त्रीणि, षड् द्वादश वा प्रमाणं स्वकीयया पद्धत्याभ्युपगच्छन्ति। तथा सत्यपि सर्वैरपि सर्वप्रमाणोपजीव्यतया प्रत्यक्षप्रमाणस्य ज्येष्ठत्वं श्रेष्ठत्वं वाङ्गीक्रियते। अनुमाने पक्षधर्मताज्ञानाय, उपमाने सादृश्यबोधाय, शब्दप्रमाणे श्रावणप्रत्यक्षाय च प्रत्यक्षमपरिहार्यतयापेक्ष्यते।

## 3. प्रत्यक्षपदार्थविचारः –

ज्ञानस्य व्यापारद्वयं वर्तते। पदार्थस्य प्रकाशनं, प्रयोजनीयार्थत्वेन तन्निश्चयश्च। इदमेव ज्ञानमर्थग्राहकतया प्रमाणं, वस्तुनिश्चायकतया प्रमाणफलं प्रमितिः प्रमा वा विद्यते। प्रत्यक्षशब्दो व्युत्पत्तिदृशा उभयथार्थं प्रकाशयितुं समर्थः। प्रमार्थे – प्रति विषयं प्रतिगतमक्षमिन्द्रियं यस्मै प्रयोजनायेति प्रत्यक्षम्। प्रमाणार्थे च – प्रतिगतं विषयं प्रतिगतं विषयसन्निकृष्टमक्षमिन्द्रियमिति प्रत्यक्षम्। इमावतिरिच्य प्रमेयार्थेऽप्ययं प्रयोक्तुं शक्यते। तद्यथा – प्रति यं विषयं प्रति गतमक्षं स प्रत्यक्षः।

## 4. प्रत्यक्षलक्षण-विचारः -

सर्वाणीन्द्रियाणि स्वकीयान् विषयान् गृह्णन्ति। तस्मादुच्यते – इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। शाब्दबोधे, संशयात्मके भ्रमात्मके च ज्ञानेऽतिव्याप्तिनिवारणाय तत्र त्रीणि विशेषणान्यपि संयोजितानि। तद्यथा – अव्यपदेश्यम्,अव्यभिचारि, व्यवसायात्मकं चेति। इयमेव साक्षात्कारिणी प्रमोच्यते। आचार्यो गङ्गेश उपाध्यायोऽपि अर्थस्य साक्षात्कारि ज्ञानमेव प्रत्यक्षमाह।

## 5. इन्द्रियार्थसन्निकर्षः –

इन्द्रियार्थयोः सम्बन्ध एव सन्निकर्षपदवाच्यस्तिष्ठति। वस्तुत इन्द्रियं वस्तुसन्निकृष्टं भूत्वैव तस्य वस्तुनः प्रकाशनं करोति। अयमेव सन्निकर्षः उद्योतकरादिभिः षोढा वर्णितः। तद्यथा – संयोगः, संयोगसमवायः, संयोगसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति।

इन्द्रियस्य द्रव्येण सह संयोगः संयोगसन्निकर्ष उच्यते। तद्यथा चक्षुरिन्द्रियस्य घटेन सह। एवमेव घटसमवेतस्य घटरूपस्य प्रत्यक्षं संयुक्तसमवायसन्निकर्षेण भवति। घटरूपसमवेतस्य घटरूपत्वस्य प्रत्यक्षं संयुक्तसमवेतसमवायसन्निकर्षेण कर्तुं शक्यते। तथैव शब्दस्य श्रावणप्रत्यक्षं समवायसन्निकर्षेण भवति। तत्समवेतस्य शब्दत्वस्य प्रत्यक्षं समवेतसमवायसन्निकर्षेण क्रियते। एवमेव भूतले घटाभावस्य प्रत्यक्षं विशेषणविशेष्यभावेन सन्निकर्षेण कर्तुं शक्यते।

**6. <u>अलौकिकाः सन्निकर्षाः</u> –**

इमान् षट् सन्निकर्षानतिरिच्याचार्येण गङ्गेशोपाध्यायेन त्रयोऽलौकिकाः सन्निकर्षा अपि स्वीकृताः। सामान्यलक्षणा प्रत्यासत्तिः, ज्ञानलक्षणा प्रत्यासत्तिः, योगजश्च सन्निकर्षः। एभिर्न केवलमिन्द्रियसम्बद्धपदार्थानामपित्वतीतानागतविप्रकृष्टपदार्था नामपि ज्ञानं भवति। तस्मादेवेमेऽलौकिकाः सन्निकर्षा उच्यन्ते। यदा कोऽपिकंचिदपि पदार्थं दृष्ट्वा तत्समवेतजातिमवगम्य तदवच्छिन्नानां पदार्थानां ज्ञानं करोति, तदासैव सामान्यलक्षणा प्रत्यासत्तिरित्युच्यते। घटे घटत्वजातिं ज्ञात्वा अनयैव सकलघटानां ज्ञानं भववति। दीधीतिकारेण रघुनाथशिरोमणिनास्याः प्रत्याख्यानं कृतम्। तथैवाद्वैतवेदान्तेऽप्यस्याः खण्डनं कृतम्। परं पक्षधरमिश्रप्रभृतिभिर्नव्यैनैयायिकैरस्याः समर्थनं कृतम्।

कंचित् पदार्थं दृष्ट्वा संस्कारवशात् तद्गुणधर्माणां ज्ञानमेव ज्ञानलक्षणाप्रत्यासत्तिरित्युच्यते। तद्यथा – दूरादेव कदलीफलं दृष्ट्वा रसनेन्द्रियसन्निकर्षं विनापि तन्माधुर्यज्ञानं भवति। तथैव रज्जौ सर्पभ्रमोऽप्यनयैव भवति।

योगिभिरतीतानागतविप्रकृष्टज्ञानं स्वकीयेन विशिष्टसामर्थ्येन क्रियते। तदेव योगजमुच्यते। वैशेषिकसूत्रे योगजज्ञानस्य सविस्तरं चर्चोपलभ्यते। न्यायदर्शनेऽपि अस्योल्लेखः प्राप्यते।[2]

प्रत्यक्षे चतुर्विधः सम्बन्धोऽपेक्षितः। आत्मनो मनसा संयोगः,इन्द्रियाणां मनसा संयोगः, मनस इन्द्रियेण संयोगः, इन्द्रियैः सह धर्माणां संयोगश्चेति। तद्विषये वात्स्यायन आह – “इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यते यज्ज्ञानं तत्प्रत्यक्षम्। न तर्हीदानीमिदं भवति। आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेनेति।”

**7. <u>अन्येषु दर्शनेषु प्रत्यक्ष-स्वरूपम्</u> –**

प्रत्यक्षीकरणस्योपरि वर्णिता प्रक्रिया प्रायो न्यायमेवावलम्बते। सम्प्रत्यन्यदर्शनेषु प्रत्यक्षविषयिणी सामान्यविचारणात्र ससंक्षेपं प्रस्तूयते।

“यत्साक्षादपरोक्षाद्ब्रह्म” इतीमां श्रुतिं प्रमाणं मत्वा ते स्वीकुर्वन्ति यत् तन्मते केवलं ब्रह्मैवापरोक्षं प्रत्यक्षं वा। तदेव चैतन्यं ब्रह्म प्रमा। तद् व्यापकतया सर्वत्रोपलभ्यते। तत्साक्षात्कारायेन्द्रियाणां प्रकाशादीनां नास्त्यावश्यकता। पदार्थप्रत्यक्षीकरणायेन्द्रियार्थसन्निकर्ष आवश्यक इति लोकप्रसिद्धिः तत्रोच्यते यद् व्यापकत्वे सत्यपि तस्याभिव्यक्तिरन्तःकरणवृत्तिभिरेव भवति। चैतन्यं यद्यपि निरुपाधिकम्, तथापि सोपाधिका भेदास्तु कल्प्यन्ते। इत्थं घटावच्छिन्ने चैतन्ये घटः कल्प्यते।

साङ्ख्ययोगेऽपि प्रत्यक्षप्रक्रिया वेदान्तसदृश्येव। परं तत्र ज्ञानमन्तःकरणस्य धर्मः, न त्वात्मगुणः। अत्रापि चित्तमिन्द्रियप्रणालिकाभिः पदार्थैः सम्बन्धं साधयति। तदनु चित्तं पदार्थाकारे विपरिणमते। चित्तस्यैषार्थाकारा विषयाकारा वृत्तिश्चित्तवृत्तिर्बुद्धिवृतिर्वा उच्यते। अन्तःकरणं तैजसं तत्त्वमुच्यते।

जैनतर्कशास्त्रप्रणेता सिद्धसेनदिवाकरो अपरोक्षत्वेनार्थस्य ग्रहणं प्रत्यक्षमाह।[3] तत्र प्रत्यक्षज्ञान इन्द्रियार्थसन्निकरषः प्रयोजको न स्वीक्रियते।

**8. <u>उपसंहारः</u> –**

यद्यप्यन्येष्वपि दर्शनेषु प्रत्यक्षविवेचनं विधीयते परं विस्तारभिया केषाञ्चित् प्रमुखाणामेवोल्लेखोऽतिसंक्षेपेण कृतः। प्रत्यक्षस्य भूयांसो भेदा अपि विविधेषु दर्शनेषु सविस्तरं वर्णिताः, परं तेषामस्मिन् लघुप्रबन्धे विवेचनं विस्तारभिया परिहृतम्।

**संदर्भ ग्रन्थः -**

1.“व्यापारवदसाधारणं कारणं करणम्।” तर्कसङ्ग्रहः।
“फलायोगव्यवच्छिन्नं कारणं करणम्।” तर्कभाषा।

2.“समाधिविशेषाभ्यासाद्” (न्यायसूत्र)

3.न्यायावतार श्लोक 4

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2020; 1(30): 111-113
© 2020 NJHSR
www.sanskritarticle.com

**डॉ. दयालसिंह पँवार**
सहाचार्य, व्याकरण-विभाग,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-विश्वविद्यालय कुतुब सांस्थानिक क्षेत्र,
नई दिल्ली 110016

**Correspondence:**
**डॉ. दयालसिंह पँवार**
सहाचार्य, व्याकरण-विभाग,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-विश्वविद्यालय कुतुब सांस्थानिक क्षेत्र,
नई दिल्ली 110016

# महाकविकालिदासस्य पारिवारिकचिन्तनम्

**डॉ. दयालसिंह पँवार**

## ➢ भूमिका –

समाजस्य निर्माणे विकासे वा परिवारस्य भवति अत्यन्तमेव महनीया भूमिका। अयमेव परिवारो भवति शिशोः प्रथमा पाथठशाला। तत्र मातैव तदीया प्रथमा शिक्षिकेत्युच्यते। अस्मिन् प्रसङ्गे वयं परिवारविषयिणीं कालिदासीयां दृष्टिं समीक्षिष्यामहे।

## ➢ कालिदास्य चिन्तनस्य प्रासङ्गिकता –

सर्वप्रथममत्र प्रश्नोऽयमुदेति किमर्थं कालिदास-ग्रन्थेषु पारिवारिक-चिन्तनं परिशील्यत इति?

वस्तुतः कालिदासो न वर्तते साधारणः कविः। तदीयमसाधारणं वैशिष्ट्यं विलोक्यैव समालोचकैर्विद्वद्भिरसौ बहुमानपुरस्सरं कविकुलगुरुपदे प्रतिष्ठापितः। भारतीय-मूल्यानां प्रतिष्ठापकोऽयं कविः भारतीय-संस्कृतेः प्रतिनिधिकविरिति न संशयः। तस्मादेव आधुनिककालेऽपि तदीयां प्रासङ्गिकतामवेक्ष्य तदीयं परिवारविषयकं चिन्तनमत्र विचार्यते।

## ➢ शृङ्गार-प्रधानतायाः सन्देशः –

कविकुलगुरोर्वाङ्मयस्य यद्यनानाविधं वैशिष्ट्यं वर्तते, तत्र नैपुण्येन शृङ्गार-चित्रणं वर्तते तदीया काचन महती विशेषता। तत्रेदमप्यवधेयं यत् तदीया नायका नायिका वा येन यया सह वा प्रणयं कुर्वन्ति, तेन तया वा सहैव परिणयसूत्रे निबद्धा भवन्ति। एकेन प्रणयः, परिणयश्चान्येन सहेति, आधुनिकी प्रवृत्तिस्तत्र न दृश्यते। तत्र कविकुलगुरोर्वर्तते कश्चन सन्देशः। स सन्दिशति पारिवारिक-जीवने प्रवेशे दंपत्योर्मध्ये सघना प्रीतिर्भवेद्, येन निखिलेऽपि पारिवारिके जीवने सदैव माधुर्यं, स्नेहः, सौहार्दं, सौभाग्यं चेत्यादयः संपदो वर्षन्त्विति। तस्मादेवासावभिज्ञानशाकुन्तले गान्धर्वं विवाहमप्यनुमोदते। तथा हि –

> **"गान्धर्वेण विवाहेन बह्व्यो राजर्षिकन्यकाः;**
> **श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः।"[1]**

## ➢ परिवारेऽपत्यस्य महत्त्वम् –

भारतीयं यत् पारिवारिकं चिन्तनं वर्तते, तदनुसारेण विवाहः भोगस्य साधनं न विद्यते। प्रत्यक्षरूपेण धर्मार्थकामसाधकोऽयं विवाहः, पारंपर्येण मोक्षस्यापि साधकम्। मानवो गृहस्थाश्रमे सर्वाणि दायित्वानि निरुह्य सर्वान् ऋणान् प्रपूर्य संन्यासाश्रमे मोक्षाय प्रयतते। रघुवंशीयानां राज्ञां माहात्म्यं प्रकाशयता कविकुलगुरुणा आश्रमव्यवस्थाया मनोरम-शैल्यां चित्रणं कृतम्।

> **"शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्;**
> **वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।"[2]**

अपत्यं भवति सविशेषं धर्मस्य मुक्तेश्च साधनम्। तस्मादपत्योपलब्धिः विवाहस्य प्रधानमुद्देश्यं स्वीकृतम्। लोकान्तरे सुखस्य पुण्स्य साधनं तु तपोदानादिकान्यपि भवितुमर्हन्ति परं सन्ततिस्तु अस्मिन लोके परलोके चोभयत्र कल्याणाय कल्पते। इयमेव भावना दिलीपेन महर्षेः वशिष्ठस्य पुरतो निवेदिता –

**"लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम्;**

**सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे।"**[3]

कालिदास-प्रणीतेषु ग्रन्थेषु विविधेषु स्थलेषु अपत्यविषयिणी चिन्ता दृश्यते। रघुवंश एव राजा दिलीपः स्वकीयां मर्मभेदिनीमसह्यां पीडां गुरवे निवेदयन्नाह –

**"तया हीनं विधातर्मां कथं पश्यन्न दूयते;**

**सिक्तं स्वयमिव स्नेहाद् वन्ध्यमाश्रमवृक्षकम्।**

**असह्यपीडं भगवन्नृणमन्त्यमवेही मे;**

**अरुन्तुदमिवालानमनिर्वाणस्य दन्तिनः।"**[4]

➢ **प्राथमिकपाठशाला-रूपेण परिवारः –**

यथास्माभिः पूर्वमप्युल्लिखितं यत् परिवारो भवति शिशोः प्राथमिकी पाठशाला, पितरौ च भवत आद्यौ शिक्षकौ। इमां मान्यतां कविकुलगुरुणाङ्गीकृत्य तदनुसारि चिन्तनं स्थाने-स्थाने प्रकाशितम्। शैशवे रघुः धात्र्या अङ्गुलिमवलम्ब्यैव गमनं शिक्षयामास, तदीयां च वाचमनुकृत्यासौ प्रथमं वच उवाच। गृहे तदीया प्रथमा प्रणिपातशिक्षा बभूव। तथा हि –

**"उवाच धात्र्या प्रथमोदितं वचः,**

**ययौ तदीयामवलम्ब्यचाङ्गुलिम्;**

**अभूच्च नम्रः प्रणिपातशिक्षया**

**पितुर्मुदं तेन ततान सोऽर्भकः।"**[5]

स रघुः मृगचर्मपरिधाय पितुरेवास्त्रविद्यां मन्त्रवत् शिक्षयामास। तत्रोच्यते –

**"त्वचं समेध्यां परिधाय रौरवीम्,**

**अशिक्षितास्त्रं पितुरेव मन्त्रवत्;**

**न केवलं तद्गुरुरेकपार्थिवः,**

**क्षितावभूदेकधनुर्धरोऽपि सः।"**[6]

➢ **विविधाः संस्काराः —**

विविधाः संस्काराः भारतीयेषु परिवारेषु अनुष्ठीयन्ते। एते संस्कारा न केवलमुत्सवरूपेणायोज्यन्ते, अपितु मानव-परिष्कारार्थमपि ते नितरामावश्यकतयापेक्ष्यन्ते। रघोर्जातकर्मसंस्कारप्रसङ्गे संस्कारविषयिणीं भारतीयां मान्यतां प्रकाशयन् कविराह यद् यथा आकरान्निर्गतो मणिः संस्कारेण नूतनं तेजो लभते, तथैव रघुरपि संस्कारेणाधिकं बभौ।

**"दिलीपसूनुर्मणिराकरोद्भवः,**

**प्रयुक्तसंस्कार इवाधिकं बभौ।"**[7]

नामकरणं भवति शिशोर्महत्त्वाधायी संस्कारः। दिलीप सम्यक्प्रकारेण विचार्यैव स्वसुतस्य नाम व्यधात्। तदीयः सुतः शास्त्रान्तं यायाद्, युधि च शत्रूनपि अन्तं गमयेदिति धिया गमनार्थकस्य रघि-धातोः प्रयोगपुरस्सरं रघुरिति नाम चकार —

**"श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः;**

**अवेक्षय धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवम्।"**[8]

रघोः चूडाकरणं विद्यारम्भश्च कथममात्यपुत्रैः सह संपन्नावित्यस्मिन् विषये तत्रोल्लिखितम्—

**"स वृत्तचूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः;**

**लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत्।"**[9]

उपनयनसंस्कारादनन्तरमेव ब्रह्मचारिणो गुरोः सकाशं विद्यामधीयते स्म। कविकुलगुरुरप्युल्लिलेख यद्विधिवद्यज्ञोपवीतादनन्तरं गुरवो रघुं विद्यया विनिन्युः—

**"अथोपनीतं विधिवद्विपश्चितो**

**विनिन्युरेनं गुरवो गुरुप्रियम्;**

**अवन्ध्ययत्नाश्च बभूवुरर्भके,**

**ततार विद्याः पवनातिपातिभिः।"**[10]

अनेन स्पष्टं यत् पितरौ बालानां सर्वविधकल्याणार्थं विविधसंस्कारपुरस्सरं यथाशक्ति यतन्ते स्म।

➢ **पारिवारिकाणां प्रीतये माङ्गलिका उपवासाः —**

पारिवारिकाणां मङ्गलं भवतु इति धिया उपवासादयोऽपि अनुष्ठीयन्ते स्म। एतादृशाः प्रसङ्गाः विविधेषु ग्रन्थेषु महाकविना समुपस्थापिताः। यथा अभिज्ञानशाकुन्तले करबभकमाध्यमेन आश्रमगतस्य दुष्यन्तस्य कृते तदीया माता सन्देशं प्रेषयति—

**"देव्याज्ञापयति आगामिनि चतुर्थदिवसे**

**प्रवृत्तपारणो मम उपवासो भविष्यति।**

**तत्र दीर्घायुषावश्यं सन्निहितेन भवितव्यमिति"**[11]

एतेन सन्देशेन ज्ञायते यत् तदीया माता तदीयं मङ्गलमुद्दिश्य उपवासं चक्रे। तथैव विक्रमोर्वशीयेऽपि पुरुरवसः पत्नी राज्ञो मङ्गलाय उपवासानुष्ठानं चक्रे। अपि च यां स कामयते, या च राजानं कामयते, तया सह राज्ञः परिणयो भवेदित्यनुमन्यते चन्द्ररोहिण्ओः साक्ष्ये।

➢ **परिवारे कन्यानां स्थितिः —**

परिवारे कन्यानां स्थितिर्भद्रतरासीदिति कालिदासीयैर्ग्रन्थैर्ज्ञायते। कुमारसंभवे शैलाधिराजतनया पितृगृहे स्नेहेन, मुदा च पोषितेति तदीयतपःप्रसंगे महाकविराह —

**"महार्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैरपि या स्म दूयते।"**[12]

इति। तदीयकन्दुकक्रीडाया अपि तत्रोल्लेखो वर्तते

**"क्लमं ययौ कन्दुकलीलयापि या"**[13]

इति। सैव स्वेच्छया प्रचण्डं तपो विधाय शिवं परितोषयामास, पतिरूपेण च तमवाप। तथैव शकुन्तलापि मनोवाञ्छितं पतिं बहूनि कष्टानि सोढ्वापि लेभे। गान्धर्वविवाहः, स्वयंवरप्रथा चापि कन्यानां स्वातन्त्र्यमेव प्रकाशयततः। पत्न्याः भूमिका-विषये विलपतोऽजस्य तत्कथनमेव पर्याप्तं, यत्र स स्वकीयां मृतां प्रियतमामिन्दुमतीं गृहिणीरूपेण, सचिवरूपेण, प्रियसखीरूपेण सस्मार —

**"गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ।**

**करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम्।।"**[14]

➢ **आदर्शपरिवारचित्रणम् —**

रघुवंशे कुमारसंभवे अन्येषु च ग्रन्थेषु विविध-स्थलेषु आदर्शपरिवाराणां कविकुलगुरुणा चित्रणं कृतम्। आदर्शपरिवाराणां परिकल्पना ऋषिभिर्दत्तेषु आशीर्वादेष्वप्यभिव्यज्यते। यथा पितुः महर्षेः कण्वस्य शकुन्तलां प्रति इयं शुभाशंसा—

**"ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव;**

**सुतं त्वमपि सम्राजं सेव पुरुमवाप्नुहि।"**[15]

तथैव शकुन्तला-दुष्यन्तसमागमे मारीचस्येयं शुभाशंसा अवधेया—

**"आखण्डलसमो भर्ता जयन्तप्रतिमः सुतः;**

**आशीरन्या न ते योग्या पौलोमी सदृशी भव।"**[16]

मारीचेन दुष्यन्तो विधिरूपेण, शकुन्तवला श्रद्धारूपेण, तयोश्चापत्यं सर्वदमनः वित्तरूपेण ऋषिणा चित्रिताः। यथा —

**"दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान्;**

**श्रद्धा वित्तं विधिश्चेति त्रितयं तत्समागतम्।"**[17]

➢ **निखिलायां प्रकृतौ पारिवारिकी भावना —**

यत्र वृक्ष-लता-नदी-समुद्र-मेघ-मृग-प्रभृतयः सर्वाणि प्राकृतिक-तत्त्वानि स्वकीयाः कौटुम्बिकाः भवन्ति, सैव कविकुलगुरोः कालिदासस्य कविता। सरयूस्तत्र श्रीरामस्य जननी भवति।

**"सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूर्वियुक्ता"**[18]

इति। वृक्षाः शैलाधिराजतनयायाः सुतनिर्विशेषाः भवन्ति।

**"गुहोऽपि येषां प्रथमाप्तजमनां न पुत्रवात्सल्यमपाकरिष्यति"**[19]

इति। विद्युन्मेघपत्नी भवति, तथा सती च सा यक्षस्य भ्रातृजाया भवति —

**"मा भूदेवं क्वचिदपि च ते विद्युता विप्रयोगः"**[20]

इति वर्तते प्रियतमावियुक्तस्य यक्षस्य मेघं प्रति शुभाशंसा। वृक्षेषु, लतासु, मृगीषु, चेत्यादिषु शकुन्तलायाः यः सौदर्यः स्नेहः, तं कालिदासातिरिक्तं को वर्णयितुं क्षम' येषां पादपानं जलपानात् पूर्वं सा शकुन्तला जलं न गृह्णाति स्म, मण्डनप्रिया सत्यपि या येषां स्नेहवशात् पल्लवमपि नादत्ते स्मऽ येषां कुसुमप्रसूतिसमये याउत्सवं विरचयति स्म, तस्याः प्रस्थानवेलायां सर्वा प्रकृतिरेव शोकाकुलाऽदृश्यत। तद्विषये महर्षेः काश्यपस्य भावोद्गारा उल्लेखनीयाः। तद्यथा —

**"पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**

**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।**

**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः**

**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥"**[21]

➢ **उपसंहारः —**

अनेन विवरणेनेदं स्पष्टं भवति यत् कालिदासस्य कविता न केवलं स्वकीयेन अलङ्कार-वैलक्षण्येन, पद-लालित्येन, अर्थ-गौरवेण, रस-माधुर्येण, कला-कौशलेन च सहृदयरसिकानां चित्तमाह्लादयति, अपितु स्वकीयेन कला-वैभवेनेयं मानवतामुजीवयन्तीः संवेदना अपि सहृदय-हृदयेषु प्रसारयति। तदीयेषु ग्रन्थेषु वयं आदर्शभूतं पारिवारिकं जीवनं पश्यामः, अपरतश्च विश्व-परिवारस्य मङ्गलमयी परिकल्पनापि तत्र पदे पदे परिलक्ष्यते। प्रकृतिरेव तत्र धातृरूपेण राजते, या सर्वान् जीवान्  सस्नेहं पोषयति। वस्तुतस्तस्य इमाः उदात्ताः भावनाः, सार्वकालिक्यः परिकल्पना एव तं कविकुलगुरुपदे स्थापयन्ति।

**पाद टिपण्णी : -**

1 अभि.शा.3/21ऽ
2 रघु.1/8
3 रघु.1/69
4 रघु.1/70-71
5 रघु.3/25
6 रघु.3/31
7 रघु.3/18
8 रघु.3/21
9 रघु।3/28
10 रघु.3/29
11 अभि.शा. अङ्क 2
12 कु.सम्।5/12
13 कु.सम्.5/19
14 रघु.8/67
15 अभि.शा.4/7
16 अभि.शा.7.28
17 अभि.शा.7/29
18 रघु.13/63
19 कु.सम्.5/14
20 मेघ.2/55
21 अभि.शा.4/9

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(25): 117-118
© 2019 NJHSR
www.sanskritarticle.com

**डॉ. दयालसिंह पँवार**
सहाचार्य, व्याकरण-विभाग,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-विश्वविद्यालय कुतुब सांस्थानिक क्षेत्र,
नई दिल्ली 110016

**Correspondence:**
**डॉ. दयालसिंह पँवार**
सहाचार्य, व्याकरण-विभाग,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-विश्वविद्यालय कुतुब सांस्थानिक क्षेत्र,
नई दिल्ली 110016

# कालिदास के ग्रन्थों में प्रजा-वात्सल्य

**डॉ. दयालसिंह पँवार**

## 1 आधुनिक-सन्दर्भ में विषय की प्रासङ्गिकता –

साहित्य के लिए समाज का दर्पण होना एक आवश्यक शर्त हो सकती है किन्तु कालजयी कृतियों का सृजन करना किसी भी साहित्यकार के लिए महान् चुनौती है। "कविर्मनीषी परिभू:स्वयंभू:" का आर्ष उद्घोष संभवतः चुनौतियों को स्वीकार करने वाले ऐसे ही कालजयी क्रान्तदर्शि कवियों के लिए किया गया था। कविता-कामिनी के विलास कहे जाने वाले कालिदास कविकुलगुरु इस लिए भी हैं क्योंकि उनकी कविता यथार्थ के साथ आदर्श का चित्रण करते हुए सनातन मानवीय मूल्यों एवं सिद्धान्तों का भी पदे पदे स्मरण कराती है। लोक-मङ्गल की भावना उनकी कविता का साध्य है। तभी तो दारुण वियोगावस्था में भी यक्ष से मेघ के प्रति यह शुभाशंसा करवाना नहीं भूलते कि – "मा भूदेवं क्वचिदपि च ते विद्युता विप्रयोगः।"[1] अर्थात् मुझ जैसे तुम्हारा कभी भी अपनी प्रियतमा विद्युत् से वियोग न हो।

आज हम एक लोकतान्त्रिक समाज में रह रहे हैं और लोकतन्त्र एक महान् मूल्य के रूप में उभरकर आया है। इस व्यवस्था में जब हम प्राचीन राजतन्त्रीय व्यवस्था का विचार करते हैं, तब हमारे मानस-पटल पर निरंकुशता की सम्भावना जैसे विषय उदित होते हैं। जबकि सच्चाई यह है कि इस लोकतान्त्रिक व्यवस्था में भी हम लोकतान्त्रिक मूल्यों तथा मानवाधिकारों की घोर उपेक्षा होते हुए देखते हैं। सच्चाई यह है कि व्यवस्था कोई भी हो, स्वार्थी तत्त्व अपनी नकारात्मक मानसिकता के कारण उसका दुरुपयोग करते ही हैं। सच्चाई यह भी है कि समाज में हर समय कम-से-कम दो वर्ग तो रहते ही हैं और वे हैं शासक और शासित। इस वास्तविकता से भी मुँह नहीं मोड़ा जा सकता कि व्यवस्था बनाए रखने के लिए ऐसा होना स्वाभाविक ही है। आवश्यक यह है कि साधन-सम्पन्न यह प्रभु-वर्ग या राजा अपने प्रभूत संसाधनों तथा शक्ति का प्रयोग शासित या प्रजा-वर्ग के लिए किस प्रकार करता है? इस प्रकार के विविध प्रश्नों का उत्तर खोजने के लिए यदि हम कालिदास के ग्रन्थों का मन्थन करते हैं तो यह भी अस्वाभाविक इस लिए नहीं है क्योंकि वह कविकुलगुरु है।

## 2 प्रजा-वात्सल्य एक गहन अवधारणा-

कविकुलगुरु के ग्रन्थों का आलोड़न करने पर यह स्पष्ट प्रतीत हो जाता है कि वे राजा के प्रजा के प्रति जिस भावना या सम्बन्ध की कल्पना रखते हैं, उसकी अभिव्यक्ति यदि कोई पद करा सकता है तो वह है प्रजा-वात्सल्य। वात्सल्य शब्द की व्याकरणिक व्युत्पत्ति पर भी विचार करें तो वह हल्की और शुष्क नहीं है। वात्सल्य शब्द के मूल में "वत्स" शब्द है। "वत्सांसाभ्यां कामबले"[2] सूत्र से वत्स शब्द से मत्वर्थीय "लच्" प्रत्यय जोड़कर बना है। उक्त व्युत्पत्ति से घटित इस शब्द में महती व्यञ्जना अन्तर्निहित है। वत्सविषयिणी कामनावती धेनु जैसे बछड़े को पाकर अपने स्तनों से दुग्ध की धवल धारा के प्रवाह को नहीं रोक पाती, वैसे कालिदास के परिकल्पना का राजा अपनी प्रजा के लिए अपना सर्वस्व विसर्जित करने को उद्यत है। "वैष्णवमतभास्कर" ग्रन्थ में वात्सल्य का लक्षण करते हुए रामानन्दाचार्य कहते हैं

"आश्रितदोषभोगित्वम्" अर्थात् जो आश्रित है, उसके दोषों को भी अपने सिर पर लेने तक की पराकाष्ठा वात्सल्य है।

**3 राजा का स्वरूप –**

कविकुलगुरु कालिदास के नाटकों तथा महाकाव्यों के नायक प्रायः राजा हैं। कुमारसम्भव की नायिका भी शैलाधिराज तनया है। फिर भी राजोचित गुणों की चर्चा करने का जो अवसर महाकवि को रघुवंश में मिला, वह किसी अन्य नाटक और काव्य में प्राप्त नहीं हुआ। कालिदास के आदर्श राजा मनु के मार्ग का अनुसरण करते हैं। दिलीप के गुणों का वर्णन करते हुए कहा गया है कि राजा दिलीप और उसकी प्रजा मनु के मार्ग से थोड़ा भी विचलित नहीं होते थे –

**"रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम्;**

**न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः।"**[3]

श्रीराम के द्वारा निर्वासित होने पर विदेहनन्दिनी का यह उद्गार भी इसी तथ्य का पोषण करता है –

**"नृपस्य वर्णाश्रमपालनं यत्**

**स एव धर्मो मनुना प्रणीतः"**[4]

वह शौर्य, पराक्रम आदि भीम तथा दया, दाक्षिण्य आदि कान्त गुणों से युक्त है।[5] राजा के शस्त्र निरीह जीवों को मारने के लिए नहीं अपितु उनकी रक्षा करने के लिए हैं। "आर्तत्राणाय वः शस्त्रम्"[6]

कविकुलगुरु अपने राजा को राजर्षि के रूप में देखना चाहते हैं। यही कारण है कि वे प्रजा के लिए सर्वस्व त्याग सकते हैं। विश्वजित् यज्ञ में रघु अपना सब धन दान कर देते हैं। "स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम्।" ऐसी स्थिति में भी वे वरतन्तु-शिष्य कौत्स की गुरु-दक्षिणा हेतु 14 सहस्र स्वर्ण-मुद्राओं की व्यवस्था के लिए कुबेर पर आक्रमण करने को तैयार हो जाते हैं।

**4 राजोचित कर्तव्यों के निर्वाह का उद्देश्य प्रजा-रञ्जन –**

राज्य-व्यवस्था के सम्यक् संचालन हेतु कर वसूल करना आवश्यक है किन्तु उसका उद्देश्य भी प्रजा का कल्याण है। राजा दिलीप की कर-व्यवस्था का वर्णन करते हुए महाकवि का यह कथन उल्लेखनीय है –

**"प्रजानमेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्;**

**सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।"**[7]

सामान्य रूप से नियम होता है कि उत्तराधिकारी न होने पर मृत व्यक्ति की सम्पत्ति का अधिकारी राजा हो जाता है किन्तु "अभिज्ञानशाकुन्तलम्" में एक दृश्य उपस्थित होता है, जिस में वणिक् धनमित्र की मृत्यु होने पर उसकी विधवा पत्नियाँ शोक-सागर में निमग्न हैं किन्तु राजा दुष्यन्त उदारतावश धनमित्र की संपत्ति अपने अधिकार में नहीं लेते और घोषणा करते हैं –

**"येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना**

**स स पापादृते तासां दुष्यन्त इति घुष्यताम्।"**[8]

अर्थात् मेरी प्रजा का कोई भी व्यक्ति यदि किसी स्नेही बन्धु से वियुक्त होता है तो वह पाप-सम्बन्ध को छोड़कर मुझे ही अपना प्रियजन माने। यही है प्रजा-वात्सल्य की पराकाष्ठा।

**5 प्रजा-वात्सल्य का उत्कृष्ट स्वरूप –**

कविकुलगुरु कालिदास के काव्यों में विशेष रूप से "रघुवंशम्" में प्रजा-वात्सल्य के अतिशय उत्कृष्ट रूप के दर्शन होते हैं। रघुवंशी राजा दिलीप के वर्णन के प्रसंग में कहा गया है कि प्रजाजन में विनय के आधान रक्षा तथा पोषण के कारण वही वास्तव में प्रजा का पिता है। अन्य पिता तो केवल जन्म के हेतु ही हैं-

**"प्रजानां विनयाधानाद् रक्षणाद्भरणादपि;**

**स पिता पितरस्तासां केवलं जन्महेतवः।"**[9]

रघुवंशी राजाओं में श्रीराम का जीवन तो प्रजा-वात्सल्य की पराकाष्ठा ही है। राम का वन-गमन माता-पिता को गौरव प्रदान करने के लिए तथा राम-राज्य प्रजा को गौरव प्रदान करने के लिए स्मरणीय है। प्रजा राम की आराध्या है और इसी प्रजाराधन की पराकाष्ठा करते हुए साक्षात् पवित्रता की मूर्ति भगवती सीता को भी निर्वासन में भेज देते हैं। विदेहनन्दिनी के निर्वासन के लिए लोकाराधक राम की भले ही आलोचना की जाती है किन्तु विचारणीय यह है कि उन्होंने ऐसा क्यों किया? सीताजी की पवित्रता पर श्रीराम को कोई सन्देह नही, किन्तु लोकापवाद उनकी दृष्टि में अत्यधिक बलवान है। वे जानते हैं कि प्रजा ने स्वच्छ चन्द्र पर पड़ने वाली पृथवी की छाया को मल के रूप में चन्द्र पर आरोपित किया है। यथा –

**अवैमि चैनामनघेति किन्तु,**

**लोकापवादो बलवान् मतो मे;**

**छाया हि भूमेः शशिनो मलत्वे-**

**नारोपिता शुद्धिमतः प्रजाभिः।**

वस्तुतः वैदेही का परित्याग श्रीराम के प्रजाराधन या प्रजा-वात्सल्य की चरम पराकाष्ठा है।

**6 उपसंहार –**

"प्रजा-सुखे सुखं राज्ञः प्रजानां च हिते हितम्" का पालन करते हुए कविकुलगुरु कालिदास के आदर्श राजा कल्याणकारी राज्य की अवधारणा को चरितार्थ करते है। तभी तो "अभिज्ञानशाकुन्तलम्" के भरत-वाक्य में प्रार्थना की गई है – "प्रवर्ततां प्रकृतिहिताय पार्थिवः"।

**संदर्भ ग्रंथ : -**


1 मेघदूतम्

2 पा.5.2.98

3 रघु.1.17

4 रघु.14.66

5 रघु.1.16

6 अभि.शा. अङ्क 1

7 रघु.1.18

8 अभि.शा.

9 रघु.1.24

UGC - CARE LISTED

ISSN-2321-7626
Vol. XXVII, Year VIII
फरवरी-अप्रैल 2021

# पाणिनीया
# PĀṆINĪYĀ

त्रैमासिक - सान्दर्भिक - पुनरीक्षितशोधपत्रिका
(Quarterly Refereed and Reviewed Research Journal)

महर्षिपाणिनिसंस्कृत-एवं-वैदिकविश्वविद्यालयः, उज्जयिनी (म.प्र.)

# अनुक्रमणिका

**संस्कृत - प्रभागः**


1. श्रीमद्देवीभागवते मणिद्वीपवर्णनम् 1
डॉ.सोमनाथदाशः

2. व्याकरण-शास्त्रे वर्णितानां परिभाषाणां सामाजिकोपयोगिता 8
डॉ. दयालसिंहः

3. रामायणे करुण एव रसो विशेषः 13
डॉ. तुलसीदासपरौहा

4. श्रीमद्भागवतपुराणे कर्मसिद्धान्तः 19
डॉ. अखिलेशकुमारद्विवेदी

5. ज्योतिष्टोमे दीक्षापरिमाणविचारः 26
डॉ. संकल्पमिश्रः

6. संस्कृत-व्याकरणशास्त्रे कर्मकारकम् - एकमध्ययनम् 31
डॉ. सत्यप्रसादमिश्रः

7. नारदप्रोक्ता गानगुणदोषाः 38
डॉ. ऋषिराजपाठकः

8. माघमहाकवेः नृपनीतिनैपुणी 48
डॉ. राधावल्लभशर्मा

9. नैरुक्तसमयालोके सायणीयर्ग्वेदभाष्यभूमिका 60
डॉ. विश्वबन्धुः

10. वेदान्तदर्शने आत्मविभुत्वविमर्शः 67
मोहनलालशर्मा

11. वास्तुशास्त्रदृष्ट्या भू-विमर्शः 72
डॉ. विजयकुमारः

# व्याकरण-शास्त्रे वर्णितानां परिभाषाणां सामाजिकोपयोगिता

*डॉ. दयालसिंहः**

## 1. भूमिका

लोकाच्छास्त्रं सर्वथा भिद्यत इत्याधुनिक-चिन्ताकानां वर्तते मान्यता। तत्राप्यस्माकं वैयाकरणनय-विषये तु "Language is caught not taught" इतीदृक्चिन्तनपरा पण्डितम्मन्या नूतन-विचारका अत्यन्तमेव मुखरीभवन्तो व्याकरणशास्त्रस्यानर्थक्यमेव प्रतिपादयन्ति। तादृशेऽस्मिन् परिवेशे शास्त्र-प्रतिपादितानां गूढसिद्धान्तानां लोकोपकार-कत्वमवश्यमेव साधनीयम्। इममेव विचारं पुरस्कृत्य व्याकरण-शास्त्रे प्रतिपादितानां परिभाषाणां लौकिकं सविशेषं सामाजिकं पक्षमाधृत्य वैशिष्ट्यमिह विविच्यते।

## 2. परिभाषाणां लक्षणम्

"परितो व्यापृतां भाषां परिभाषां प्रचक्षते।"[1] "अनियमे नियमकारिणी परिभाषे"ति प्रसिद्धं विद्यते परिभाषा-लक्षणम्। व्याकरण-शास्त्रोपादेयानां परिभाषाणामासां परिष्कृतलक्षणं विद्वांसो निगदन्ति-सङ्केतग्राहकशास्त्रभिन्नत्वे सति सकलशब्दधर्मिकसाधुत्वप्रकारकबोधोपपादकशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दित-बोधोपकारित्वं परिभाषात्वमिति। अनन्तास्विमासु परिभाषासु प्रायशः पञ्चाशन्मितानां परिभाषाणामुल्लेखः सूत्रत्वेनाचार्येण पाणिनाष्टाध्याय्यां कृतः।

* सहाचार्यः, व्याकरणविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः कुतुब-सांस्थानिक-क्षेत्रम् , नवदेहली- 110016

National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2021; 1(36): 128-130
© 2021 NJHSR
www.sanskritarticle.com

**डॉ. दयालसिंह पँवार**
सहाचार्य, व्याकरण-विभाग,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालय कुतुब सांस्थानिक क्षेत्र,
नई दिल्ली 110016

**Correspondence:**
**डॉ. दयालसिंह पँवार**
सहाचार्य, व्याकरण-विभाग,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालय कुतुब सांस्थानिक क्षेत्र,
नई दिल्ली 110016

# वर्ण-समीक्षा के आलोक में वागुत्पत्ति-विमर्श

**डॉ. दयालसिंह पँवार**

## 1. भूमिका-

भगवती श्रुति ने जिन सिद्धान्त-रत्नों को अपने गर्भ में धारण किया,उन सिद्धान्तों ने विभिन्न स्वरूपों में अपनी विलक्षण प्रतिभा से भारतीय जीवन-पद्धति को इतना दिव्य और भव्य बनाया कि उस प्रदीप्त वातावरण में अनेक नर-रत्नों,मनीषियों और ऋषियों का अवतरण भारत वसुन्धरा पर हुआ। भगवती श्रुति द्वारा प्रसूत उन विभिन्न सिद्धान्तों में वाक्-तत्त्व-विषयक चिन्तन अद्भुत है। वाक्-चिन्तन की इसी आधार-भूमि पर वैयाकरणों के आप्त-पुरुष, महा-मनीषी भर्तृहरि ने शब्द-ब्रह्मवाद का महाप्रासाद खडा किया।

पण्डित-प्रवर मधुसूदन ओझा जी ने अपने ग्रन्थ "वर्ण-समीक्षा" में अपनी विलक्षण प्रतिभा से वागुत्पत्ति से सम्बद्ध श्रुति- प्रतिपादित विविध पक्षों का उपस्थापन किया है। श्रुति के वर्णन अत्यन्त रहस्यात्मक हैं। पण्डित ओझा ने इन रहस्यों का उद्घाटन अत्यन्त सरल शैली में निपुणता से किया है।

## 2. मूल द्रव्य के रूप में प्राण की प्रतिष्ठा-

श्रुति में मूल द्रव्य के रूप में विभिन्न स्थलों पर नाना द्रव्यों का प्रतिपादन किया गया है। यथा-ऋग्वेद,यजुर्वेद तथा सामवेद में सृष्टि के मूल द्रव्य के रूप में सत्य को स्वीकार किया गया है– **"सत्येनोत्तभिता भूमि: सूरेणोत्तभिता: द्यौ:,ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधिश्रित:"**[1] । अथर्ववेद के अनुसार ऋत समस्त सृष्टि का मूल है- **"ऋतमेव परमेष्ठि ऋतमनात्येति किञ्चन,ऋते समुद्र आहित: ऋते भूमिरियं श्रिता"**[2] । संशयतदुच्छेदवाद ग्रन्थ में पण्डित ओझा ने दीर्घतमा के मत के सन्दर्भ में उल्लेख किया है कि वाक् ऋत की प्रथमजा अर्थात् प्रथम सृष्टि है- **"यथा माऽगन प्रथमजा ऋतस्य"**[3] **"यथा ममान्तर हृदि वागुपागात,आत्मानमेतां प्रवदामि वाचम्"**[4]

श्रुति के अनेक विवरणों से ज्ञात होता है कि प्राण को ही मूल द्रव्य के रूप में प्रतिष्ठित किया गया है- **"प्राणो मूलद्रव्यम्"**[5] । प्राण को ऋषियों के रूप में स्वीकार किया गया है-**"प्राणा एव ऋषय:"**[6] । यहां पर उल्लेख प्राप्त होता है कि प्राणों से पितृ-गण उत्पन्न हुए। पितृगणों से देवताओं व असुरों की उत्पत्ति हुई, देवताओं से चराचर सृष्टि की उत्पत्ति हुई।

## 3. छान्दोग्य श्रुति में तीन तत्त्व:-

छान्दोग्य श्रुति में यह उल्लेख प्राप्त होता है कि प्राण ही तेजस्,आप् और अन्न के रूप में विवर्त को प्राप्त हुआ। जब प्राण तेजोमय होता है तो वाक् का आविर्भाव होता है। जब यह प्राण आपोमय होता है, तब प्राण ही रहता है। जब यह प्राण अन्नमय होता है तो मनस् के रूप में परिवर्तित होता है। ये तीनों वाक्, प्राण और मनस् इतने संसक्त व गुंथे हुए होते हैं कि एक दूसरे की अलग से पहचान नहीं की जा सकती।

तीनों ही एक दूसरे के बिना न तो उत्पन्न ही हो सकते हैं और न एक दूसरे के बिना टिक सकते हैं। तीनों तत्त्व एक दूसरे में लीन रहते हैं। छान्दोग्य श्रुति में स्पष्ट रूप से कहा गया है कि **"अन्नमयं मन:,आपोमय: प्राण:,तेजोमयी वाक्"**।

## 4. सत् तथा असत् के रूप में प्राण की प्रतिष्ठा-

यह सन्देह भी हो सकता है कि वाक् यदि तेजोमयी है तो प्राण से उसका आविर्भाव कैसे हो सकता है? उत्तर के रूप में कहा जा सकता है कि मूल उपादान प्राण ही है और वही तेजस् के रूप में विवर्त दशा में दिखाई देता है। वेदों में कहीं पर सृष्टि के आदि में सत् तो कहीं पर असत् की चर्चा प्राप्त होती है । सामान्य जन के लिये यह एक विचित्र पहेली प्रतीत होती है। इस प्रसङ्ग में यह गुत्थी बडी सरलता से सुलझाई गई है। सत् से सृष्टि कि उत्पत्ति का तात्पर्य यह है कि मूल उपादान प्राण है और वह सत् है। असत् से सृष्टि की उत्पत्ति का अर्थ प्राण की असद्-रूपता नहीं है बल्कि इस प्रपञ्च का उस अवस्था में न होना ही असत् है। अत: असत् से सृष्टि की उत्पत्ति की चर्चा प्राप्त होती है। असत् से किसी प्रकार का भ्रम न हो अत: छान्दोग्योपनिषद् में सत् से सृष्टि की उत्पत्ति का वर्णन किया गया है। यहां सत्-पद से वाच्य प्राण ही है और प्राण का रूपान्तर ही वाक् है **"तस्मात् प्राणमेव रूपान्तरमापन्नो वाक्छन्द:"** [7]।

## 5. वाजसनेयी श्रुति के अनुसार वागुत्पत्ति-

वाजसनेयी श्रुति के अनुसार आत्मा के लिये तीन तत्त्वों की आवश्यकता होती है-मनस्,वाक् तथा प्राण। अत: आत्मा मनोमय,वाङ्मय तथा प्राणमय है। वाक् का शरीर पृथ्वी है और ज्योति रूप अग्नि है जहां तक वाक् की गति होती है वहीं तक पृथ्वी और अग्नि की भी गति होती है। मन का शरीर द्यौ है और ज्योति आदित्य है। वाजसनेयी श्रुति के अनुसार वाक् और मन मिथुन भावापन्न होते हैं और उससे प्राण आविर्भूत होता है। उसी को इन्द्र कहा गया है। उसका शरीर आप् है और ज्योति चन्द्र है।

वाजसनेयी श्रुति के अनुसार वाक् और मन से प्राण की उत्पत्ति होती है जबकि पहले हम देख चुके हैं कि प्राण से इन तत्त्वों का आविर्भाव हुआ है। समाधान के रूप में कहा गया है कि प्राण द्विविध है-कारणात्मा और कार्यात्मा। इस प्रकार कारणात्मा प्राण से यहां कार्यात्मा प्राण की उत्पत्ति प्रदर्शित की गई है।

## 6. श्रुतियों में आग्नेयी वाक् का स्वरूप-

तैत्तिरीयोपनिषद् में कहा गया है कि अग्नि ही वाक् बनकर मुख में प्रविष्ट हुई **"अग्निर्वाग्भूत्वा मुखं प्राविशत्"** इसी लिये वाक् को आग्नेयी कहा गया है और वाक् का उपादान कारण प्राण ही है। ऐसा भी उल्लेख प्राप्त होता है कि प्रजापति ने प्रजा कि उत्पत्ति हेतु तप किया और तप से रयि और प्राण के मिथुन को उत्पन्न किया । यह प्राण और रयि क्या है? इस विषय में कहा गया है **"प्राण एवाग्नि: रयि: सोम:"**[8] । इस प्रकार यह सम्पूर्ण सृष्टि अग्नि-षोमात्मक है। इससे वाक् का आग्नेयी होना भी सिद्ध हो जाता है। प्राण के अग्नि के रूप में वर्णन होने से यह भी स्पष्ट हो जाता है कि यह वाक् प्राणमूला है **" अथवा कार्यद्रव्यपरोऽयमग्निशब्द:"** । वह भी प्राण का विकार होने से प्राण-रूप ही है।

## 7. इन्द्र और वाक्-तत्त्व

विभिन्न श्रुतियों में इन्द्र के वाक्-तत्त्व से सम्बन्ध की भी चर्चा की गई है। प्राण के तीन विकारों की चर्चा श्रुतियों में की गई है। ये विकार कहीं पर अग्नि,वायु और इन्द्र कहे गये हैं तथा कहीं पर तीन विकारों के रूप में अग्नि,आदित्य और इन्द्र की चर्चा की गई है। वाक् को ऐन्द्री भी कहा गया है। यह शङ्का भी की गई है कि यदि प्राण उपादान कारण है तो वाक् ऐन्द्री कैसे हो सकती है? इस सन्दर्भ में वाजसनेयी श्रुति कहती है कि जो मध्यम प्राण है वही इन्द्र है **" स योऽयं मध्ये प्राण एष एवेन्द्र:"**।

श्रुति में प्रज्ञा को भी इन्द्र कहा गया है। वायु ही प्राण है। उसकी सहायता से प्रज्ञा ही पद और अक्षर के रूप में आविर्भूत होकर अर्थ को प्रकट करती है। कृष्ण यजुर्वेद के षष्ठ-काण्ड में उल्लेख प्राप्त होता है कि पूर्वकाल में वाणी प्रकृति-प्रत्यय में अविभक्त या अव्याकृत थी। देवताओं ने इन्द्र से वाणी को व्याकृत करने का निवेदन किया। इन्द्र ने वायु की सहायता से वाणी को मध्य भाग से अर्थात् प्रकृति-प्रत्यय में विभक्त किया। इस प्रकार लोक में इन्द्र व्याकरण-कर्त्ता के रूप में प्रसिद्ध हुआ और वाक् को ऐन्द्री कहा जाने लगा। वायु के वाणी के उत्पादन में सहायक होने के कारण ही वाक् को प्राणात्मक कहा जाता है।

## 8. वागुत्पत्ति की शब्दशास्त्रीय दृष्टि-

विभिन्न शब्दशास्त्रीय आचार्यों ने भी वाणी की उत्पत्ति के विषय में पर्याप्त चिन्तन किया है। पाणिनीय शिक्षा में वाणी की उत्पत्ति के क्रम को अत्यन्त ही सरल एवं रोचक ढंग से प्रतिपादित किया गया है। वहां उल्लेख प्राप्त होता है कि विवक्षा के कारण आत्मा बुद्धि के बल से अर्थ को प्राप्त कर मन को प्रेरित करता है। मन शरीर की अग्नि को प्रेरित करता है और अग्नि वायु को प्रेरित करता है। वही वायु हृदय में चलता हुआ मन्द्र वायु को उत्पन्न करता है वह मध्यमा वाक् कैसे वैखरी वाक् के रूप में परिणत होती है। इसका उल्लेख सङ्क्षेप में किया गया है। इसी प्रकार आचार्य भर्तृहरि ने भी अपने प्रसिद्ध ग्रन्थ वाक्यपदीयम् में शब्दब्रह्म,स्फोट आदि रूपों में वाक्-तत्त्व का विस्तार से निरूपण किया है।

वाक्-तत्त्व के विषय में विभिन्न आलङ्कारिक उल्लेख भी प्राप्त होते हैं। कौषीतकीय श्रुति में उल्लेख प्राप्त होता है कि पुरुष प्रतिदिन अग्निहोत्र करता है। जब पुरुष बोलता है तब वह प्राण का वाणी में हवन करता है। मौनावस्था में जब वह सांस लेता है तब वह वाणी

का प्राण में अग्निहोत्र करता है। इससे सिद्ध होता है कि प्राण ही रूपान्तरापन्न वाक् है।

**9. वागुत्पत्ति की अवस्थाएं और निमित्तक गुण-**

कुछ ऐसे धर्म हैं जिनके कारण प्राण वाग्-व्यपदेश को प्राप्त करता है। उन्हीं को गुण कहा जाता है इनके अभाव में वाक् प्राण के रूप में परिणत नहीं हो सकता। स्वर,मात्रा,स्थान,करण,बल तथा अनुप्रदान के रूप में शब्दशास्त्रीय ग्रन्थों में इन गुणों का उल्लेख प्राप्त होता है। प्राणावस्था से वागवस्था की सिद्धि तक सात अवस्थाओं का उल्लेख प्राप्त होता है। ये अवस्थायें हैं-तैजस्-प्राण,वायु,श्वास,नाद,श्रुति,स्वर और वर्ण। जब वह मूल द्रव्य शरीर की ब्रह्मग्रन्थि में प्रकृतिस्थ रहता है, तब प्राण कहलाता है। शरीराग्नि से विक्षुब्ध होकर जब वह ऊपर की ओर संचरण करता है तो वह वायु कहलाता है। वही श्वास और नाद बनकर क्रम से नाभि आदि से संयुक्त होकर विविधता को धारण करते हुए श्रुति और स्वर के रूप में परिणत होता है। जब वह और ऊपर उठकर वक्ष,कण्ठ या भ्रू-मध्य में उछलता है तो कपाल के आवरण के कारण लौटकर मुख-बिल में प्रवेश करता है और वहां से नाना रूप वर्णों में वैकरी वाक् के रूप में परिणत होता है।

**10. उपसंहार-**

उपर्युक्त विवरण से यह स्पष्ट हो जाता है कि विभिन्न श्रुतियों में वागुत्पत्ति के सन्दर्भ् में मूल द्रव्य के रूप में प्राण को ही स्वीकार किया गया है। इस सन्दर्भ में अनेक रोचक आख्यान भी वैज्ञानिक सत्य का ही प्रतिपादन करते हैं। निश्चित रूप से यह कहा जा सकता है कि व्याकरण-शास्त्र को दर्शन की कोटि मे प्रतिष्ठित करने की आधार-भूमि श्रुति-ग्रन्थों में ही निर्मित हो गई थी। शब्द-शास्त्र के मनीषियों ने उनसे पर्याप्त प्रेरणा ग्रहण की। आधुनिक काल में भी यह शब्दशास्त्रीय चिन्तन निरन्तर गतिशील है।

**पाद टिपण्णी : -**

1 संशयतदुच्छेदवादः,संशयाधिकार,भाग२,

2 पूर्ववत

3 पूर्ववत

4 पूर्ववत

5 वर्ण समीक्षा,पृ.१०४

6 पूर्ववत

7 छान्दोग्योपनिषद्

8 प्रश्नोपनिषद्

राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला - ३५८ ISSN - 2231-0452

# उत्कर्षदीपिका
# Utkarṣadīpikā

(महस्विनी-विशेषाङ्कः)

प्रधानसम्पादकः
आचार्यः गुळ्ळपल्लि श्रीरामकृष्णमूर्त्तिः



सम्पादकाः
आचार्यः कोराड सूर्यनारायणः
आचार्यः सतीशः के.एस्.
डॉ.उदयनहेगडे

राष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयाविश्वविद्यालयः)
तिरुपतिः - ५१७ ५०७
२०२३

# उत्कर्षदीपिका

(महस्विनीविशेषाङ्कः - २०२३)

## शोधलेखानुक्रमः


| क्र.स. | विषयः | पुटाङ्कः |
|---|---|---|
| १. | भारतीयज्ञानपरम्परायां निहितानि तत्त्वानि<br>– प्रो.रामसलाहीद्विवेदी | 1 |
| २. | कालिदासीयाः केचनापत्यप्रत्ययान्ताः<br>– प्रो.जयकान्तसिंहशर्मा | 5 |
| ३. | सांख्यदर्शने मोक्षस्यावधारणा<br>– प्रो.सुजातात्रिपाठी | 15 |
| ४. | ईश्वरस्वरूपमीमांसा<br>– प्रो.मारकण्डेयनाथतिवारी | 21 |
| ५. | विविधशास्त्रप्रयुक्तगुणपदार्थनिरूपणम्<br>– डॉ. दयाल सिंह पंवार | 34 |
| ६. | न्यायवैशेषिकशास्त्रे मनस्तत्त्वविचारः<br>– प्रो. बिष्णुपदमहापात्रः | 38 |
| ७. | शिक्षाशास्त्रे नवीनाः विचाराः<br>– आचार्य. के. भरतभूषणः | 46 |
| ८. | वैदिकदर्शनानां सृष्टिप्रक्रिया प्रामाण्यवादस्य सन्दर्भे<br>– प्रो.प्रभाकरप्रसादः | 52 |
| ९. | वैदिकवाङ्मये कालविज्ञानस्य विविधपक्षाः<br>– प्रो. प्रेम कुमार शर्मा | 58 |
| १०. | भारतीयजैनज्ञानपरंपरा<br>– प्रो.अनेकांतकुमारजैनः | 67 |

महस्विन्याः विशेषाङ्कः - उत्कर्षदीपिका
विद्वत्समीक्षिता मूल्याङ्किता च शोधपत्रिका (ISSN: 2231-0452), वर्षम् : २०२३

# विविधशास्त्रप्रयुक्तगुणपदार्थनिरूपणम्

डॉ. दयाल सिंह पंवार*

## 1. भूमिका

भारतीयशास्त्रीयपरम्परा भव्या सुदीर्घा विलक्षणा च वर्तते। विविधेषु शास्त्रेषु तद्विषयप्रतिपादनार्थं विशिष्टानां संज्ञानां, पारिभाषिकशब्दावल्याः प्रयोगो विधीयते। नैके शब्दा एवंविधा भवन्ति, ये विविधेषु शास्त्रेषु भिन्नार्थेषु प्रयुज्यन्ते। एवंविधेषु नानार्थकेषु शब्देषु गुण इति पदं नानाशास्त्रप्रयुक्तत्वादनेकार्थतया वैलक्षण्यमावहति।

लोकेऽप्ययं गुणशब्दो दयादाक्षिण्यशौर्यादिभावानां वाचकत्वेन, पदार्थानां वैशिष्ट्यप्रतिपादकधर्मतया, रज्जुपर्यायतया च प्रयुज्यते। अमरकोशकार आह **"मौर्व्यां द्रव्याश्रिते सत्त्वशौर्यसन्ध्यादिके गुणः"** गुणशब्दस्यार्थविस्तरं द्रष्टुम्, अर्थविशेषेषु वास्यार्थसङ्कोचमालोचयितुं विविधशास्त्रेषु गुणशब्द उपरिष्टाद् विविच्यते।

## 2. व्याकरणशास्त्रे गुणपदप्रयोगः -

अष्टाध्यायीति लघुग्रन्थस्य महाशास्त्रस्य वा प्रणेता लक्ष्यैकचक्षुष्को भगवान् पाणिनिः **"अदेङ् गुणः"** इति सूत्रं प्रणीय अकार एकार ओकारे चेति स्वरत्रये गुणपदशक्तिं स्थापयामास। तस्मात् प्रक्रियायां गुण इत्युच्यमान एषामेव वर्णानामुपस्थितिर्भवति। अतो **"आद् गुणः"** इति सूत्रेण विहितः सन्धिरपि गुणसन्धित्वेन प्रसिद्धः। अत्रेदमप्युल्लेखनीयं यत् **"संख्याया गुणस्य निमाने मयट्"** इति सूत्रे गुणस्य भागमित्यर्थं चक्रुर्वैयाकरणाः। प्रक्रियेतरस्थलेषु तु पदार्थधर्मत्वेन, तद्विशेषतारूपेण वा गुणपदव्यवहारो भाष्यादौ दृश्यते। तद्यथा – स्फोटः शब्दः ध्वनिस्तद्गुणः।

## 3. वैशेषिकदर्शने गुणपदप्रयोगः -

वैशेषिकदर्शने सप्तपदार्थेषु द्वितीयः पदार्थो वर्तते गुणः। न्यायवैशेषिकदर्शनयोः या संयुक्ता धारा सम्प्रति दृश्यते, तत्रापि पदार्थनिरूपणं वैशेषिकदर्शनानुगुणं विद्यते। अत्र

---

* सहाचार्यः, व्याकरणविभागः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली